# Shristhala Devi Arati

# શ્રીસ્થલદેવીઆરતિક્યમ્

## Document Information

Text title : Shristhala Devi Arati

File name : shrIsthaladevIAratI.itx

Category : devii, devI, AratI

Location : doc_devii

Transliterated by : Vani V vanirvs at gmail.com

Proofread by : Vani V vanirvs at gmail.com

Latest update : October 31, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 31, 2020

*sanskritdocuments.org*

# શ્રીસ્થલદેવીઆરતિક્યમ્

યત્કર્મ-ધર્મ-નિલયં પ્રવદન્તિ તજ્જ્ઞાઃ
યજ્ઞાદિ પુણ્યમખિલં સકલં ત્વયૈવ ।
ત્વં ચેતના યત ઇતિ પ્રવિચાર્ય ચિત્તે
નિત્યં ત્વદીય ચરણૌ શરણં પ્રપદ્યે ॥ ૧॥

પાથોઽધિનાથ તનયા પતિરેષ શેષ
પર્યઙ્કુ લાલિત વપુઃ પુરુષઃ પુરાણઃ ।
ત્વન્મોહ-પાશ-વિવશો જગદમ્બસોઽપિ
વ્યાઘૂર્ણમાનનયનઃ શયનં ચકાર ॥ ૨॥

તત કૌતુકં જનનિ યસ્ય જનાર્દનસ્ય
કર્ણપ્રસૂતમલજૌ મધુ-કૈટભાખ્યૌ ।
તસ્યાપિ યૌ ન ભવતઃ સુલભૌ નિહન્તું
ત્વન્માયયા કવિલતૌ વિલયં ગતૌ તૌ ॥ ૩॥

યન્માહિષં વપુરપૂર્વબલોપપન્નં
યન્નાક નાયક પરાક્રમ જિત્વરં ચ ।
યલ્લોકશોકજનનવ્રાતબદ્ધ-હાર્દં
તલ્લીલયૈવ દલિતં ગિરિજે ભવત્યા ॥ ૪॥

યો ધૂમ્રલોચન ઇતિ પ્રથિતઃ પૃથિવ્યાં
ભસ્મી બભૂવ સ રણે તવ હુઙ્કૃતેન ।
સર્વાસુરક્ષયકરે ગિરિરાજકન્યે મન્યે
સ્વમન્યુ દહને કૃત એષ હોમઃ ॥ ૫॥

કેષામપિ ત્રિદશનાયક પૂર્વકાણાં
હન્તું ન જાતુ સુલભાવિતિ ચણ્ડમુણ્ડૌ ।
તૌ દુર્મદૌ સપદિ ચામ્બર તુલ્યમૂર્તે
મતિસ્તવાસિકુલિશાત્ પતિતૌ વિશીર્ણૌ ॥ ૬॥

દૌત્યેન તે શિવ ઇતિ પ્રથિતપ્રભાવો
દેવોઽપિ દાનવપતેઃ સદનં જગામ ।
ભૂયોઽપિ તસ્ય ચરિતં પ્રથયાઞ્ચકાર
સા ત્વં પ્રસીદ શિવદૂતિ વિજૃમ્ભિતેન ॥ ૭॥

ચિત્રં તદેતદમરૈરપિ યે ન જેયાઃ
શસ્ત્રાભિઘાત-પતિતાદ્રુધિરાદપર્ણે ।
ભૂમૌ બભૂવુરમિતાઃ પ્રતિરક્તબીજા
સ્તેઽપિત્વયૈવ ગગને ગલિતાઃ સમસ્તાઃ ॥ ૮॥

આશ્ચર્યમેતદતુલં યદ્ભૂત્ સુરારી
ત્રૈલોક્યવૈભવવિલુણ્ઠનહૃષ્ટપાણી ।
શસ્ત્રૈર્નિહત્ય ભુવિ શુમ્ભ-નિશુમ્ભસંજ્ઞૌ
નીતૌ ત્વયા જનનિ તાવપિ નાકલોકમ્ ॥ ૯॥

ત્વત્તેજસિ પ્રલયકાલ હુતાશનેઽસ્મિં-
સ્તસ્મિન્ પ્રયાન્તિ વિલયં ભુવનાનિ સદ્યઃ ।
તસ્મિન્નિપત્ય શલભા ઇવ દાનવેન્દ્રા
ભસ્મી ભવન્તિ હિ ભવાનિ કિમત્ર ચિત્રમ્ ॥ ૧૦॥

તત્કિં ગૃણામિ ભવતીં ભવ તીવ્રતાપ
નિર્વાપણ-પ્રણયનીં પ્રણમઞ્જનેષુ ।
તત્કિં ગૃણામિ ભવન્તી ભવ તીવ્ર તાપ
સંવર્દ્ધન-પ્રણયનીં વિપદિ સ્થિતેષુ ॥ ૧૧॥

વામે કરે તદિતરે ચ તથોપરિષ્ઠાન્
પાત્રં સુધારસયુતં વરમાતુલુઙ્ગમ્ ।
ખેટં ગદાં ચ દધતીં ભવતીં ભવાનિ
ધ્યાયન્તિ યેઽરુણનિભાં કૃતિનસ્ત એવ ॥ ૧૨॥

યદ્વારુણાત્ પરમિદં યદિ માનવાસ્તે
બીજં સ્મરેદનુદિનં દહનાધિરૂઢમ્ ।
માયાઙ્કિતં તિલકિતં તરુણેન્દુ બિન્દુ-
નર્દૈરમન્દમિહ રાજ્યમસૌ ભુનક્તિ ॥ ૧૩॥

આવાહનં યજનવર્ણનમગ્નિહોત્રં

કર્માર્પણં તવ વિસર્જનમત્ર દેવિ ।
મોહાન્મયા કૃતમિદં સકલાપરાધં
માતઃ ક્ષમસ્વ વરદે બહિરન્તરસ્થે ॥ ૧૪॥

અન્તઃ સ્થિતાપ્યખિલ જન્તુષુ જન્તુરૂપા
વિદ્યોતસે બહિરિવાખિલ વિશ્વરૂપા ।
કા ભૂરિશબ્દરચના વચનાધિકા સા
દીનં જનં જનનિ મામવ નિષ્પ્રપઞ્ચમ્ ॥ ૧૫॥

એતત્પઠેદનુદિનં દનુજાન્તકારિ
ચણ્ડીચરિતમતુલં ભુવિ યસ્ત્રિકાલમ્ ।
શ્રીમાન્ સુખી સ વિજયી સુભગઃ કૃતી સ્યાત્
ત્યાગી ચિરન્તનવપુઃ કવિ ચક્રવર્તી ॥ ૧૬॥

ઇતિ ।

Sarthal or Shristhala devi or aShTAdashabhUjA devI is worshipped in Kishtavad (kishtwar, kaShTavArakaH deshaH) in Haryana

Encoded and proofread by Vani V

*Shristhala Devi Arati*

pdf was typeset on October 31, 2020

Please send corrections to *sanskrit@cheerful.com*